# UNIVERSITY SONG

University Song is written by renowned Sanskrit Scholor Mahakavi Dr. G.B. Palsule. It reflects the respect about Sanskrit language and very rich tradition of various Sanskrit dharmagranthas.

## विश्वविद्यालयगीतम्

शतशतकोटिशरत्पर्यन्तम्
प्रवहतात् संस्कृतमन्दाकिनी ।।धृ।।

सिन्धु–शुतुद्री–सरस्वतीनाम्
तटे ऋषीणां ध्यानपराणाम्
होमधूमपावितलोकानाम्
अत्रिभृगूणां छन्दोवाणी ।।1।।
प्रवहतात्..........

वाल्मीकिमुनि–व्यासविरचिता
रामकृष्णयोः पावन–गाथा
अखण्डदीपो भगवद्गीता
कर्मयोगसंदेशवाहिनी ।।2।।
प्रवहतात्........

राष्ट्रैक्यस्य च महती स्फूर्तिः
विना संस्कृतं नैव संस्कृतिः
पुष्टिंतुष्टिंसमावहन्ती
इहपरत्र कल्याणकारिणी ।।3।।
प्रवहतात्........

**रचयिता–महाकवी – डॉ. ग. बा. पळसुले**

**......................**